SADVIDYA FOUNDATION

# Yoga Sutra - Level 1 - Chapter 1

Intro. अथ पातञ्जल-योग-सूत्राणि।
atha pātañjala-yoga-sūtrāṇi।

प्रथमः समाधि-पादः।
prathamaḥ samādhi-pādaḥ।

Sutra 1 अथ योग-अनुशासनम्।
atha yoga-anuśāsanam।

2 योगः चित्त-वृत्ति-निरोधः।
yogaḥ citta-vṛtti-nirodhaḥ।

3 तदा द्रष्टुः स्वरूपे अवस्थानम्।
tadā draṣṭuḥ svarūpe avasthānam।

4 वृत्ति-सारूप्यम् इतरत्र।
vṛtti-sārūpyam itaratra।

5 वृत्तयः पञ्चतय्यः क्लिष्ट-अक्लिष्टाः।
vṛttayaḥ pañcatayyaḥ kliṣṭa-akliṣṭāḥ।

6 प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः।
pramāṇa-viparyaya-vikalpa-nidrā-smṛtayaḥ।

7 प्रत्यक्ष-अनुमान-आगमाः प्रमाणानि।
pratyakṣa-anumāna-āgamāḥ pramāṇāni।

8 विपर्ययः मिथ्या-ज्ञानम् अतद्रूप-प्रतिष्ठम्।
viparyayaḥ mithyā-jñānam atadrūpa-pratiṣṭham।

9 शब्द-ज्ञान-अनुपाती वस्तु-शून्यः विकल्पः।
śabda-jñāna-anupātī vastu-śūnyaḥ vikalpaḥ।

10 अभाव-प्रत्यय-आलम्बना वृत्तिः निद्रा।
abhāva-pratyaya-ālambanā vṛttiḥ nidrā।

11 अनुभूत-विषय-असम्प्रमोषः स्मृतिः।
anubhūta-viṣaya-asampramoṣaḥ smṛtiḥ।

12 अभ्यास-वैराग्याभ्यां तत् निरोधः।
abhyāsa-vairāgyābhyāṃ tat nirodhaḥ।

13 तत्र स्थितौ यत्नः अभ्यासः।
tatra sthitau yatnaḥ abhyāsaḥ।

14 सः तु दीर्घ-काल-नैरन्तर्य-सत्कार-आसेवितः दृढ-भूमिः।
saḥ tu dīrgha-kāla-nairantarya-satkāra-āsevitaḥ dṛḍha-bhūmiḥ।

15 दृष्ट-आनुश्रविक-विषय-वितृष्णस्य वशीकार-सञ्ज्ञा वैराग्यम्।
dṛṣṭa-ānuśravika-viṣaya-vitṛṣṇasya vaśīkāra-sañjñā vairāgyam।

16 तत् परं पुरुष-ख्यातेः गुण-वैतृष्ण्यम्।
tat paraṃ puruṣa-khyāteḥ guṇa-vaitṛṣṇyam।

17 वितर्क-विचार-आनन्द-अस्मिता-रूप-अनुगमात् सम्प्रज्ञातः।
vitarka-vicāra-ānanda-asmitā-rūpa-anugamāt samprajñātaḥ।

18 विराम-प्रत्यय-अभ्यास-पूर्वः संस्कार-शेषः अन्यः।
virāma-pratyaya-abhyāsa-pūrvaḥ saṃskāra-śeṣaḥ anyaḥ।

19 भव-प्रत्ययः विदेह-प्रकृति-लयानाम्।
bhava-pratyayaḥ videha-prakṛti-layānām।

20 श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-पूर्वकः इतरेषाम्।
śraddhā-vīrya-smṛti-samādhi-prajñā-pūrvakaḥ itareṣām।

21 तीव्र-संवेगानाम् आसन्नः।
tīvra-saṃvegānām āsannaḥ।

22 मृदु-मध्य-अधिमात्रत्वात् ततः अपि विशेषः।
mṛdu-madhya-adhimātratvāt tataḥ api viśeṣaḥ।

23 ईश्वर-प्रणिधानात् वा।
īśvara-praṇidhānāt vā।

24 क्लेश-कर्म-विपाक-आशयैः अपरामृष्टः पुरुष-विशेषः ईश्वरः।
kleśa-karma-vipāka-āśayaiḥ aparāmṛṣṭaḥ puruṣa-viśeṣaḥ īśvaraḥ।

25 तत्र निरतिशयं सर्वज्ञ-बीजम्।
tatra niratiśayaṃ sarvajña-bījam।

26 सः पूर्वेषाम् अपि गुरुः कालेन-अनवच्छेदात्।
saḥ pūrveṣām api guruḥ kālena-anavacchedāt।

27 तस्य वाचकः प्रणवः।
tasya vācakaḥ praṇavaḥ।

28 तत् जपः तत् अर्थ-भावनम्।
tat japaḥ tat artha-bhāvanam।

29 ततः प्रत्यक् चेतन-अधिगमः अपि अन्तराय-अभावः च।
tataḥ pratyak cetana-adhigamaḥ api antarāya-abhāvaḥ ca।

30 व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्ति-दर्शन-अलब्ध-भूमिकत्व-अनवस्थितत्वानि
vyādhi-styāna-saṃśaya-pramāda-ālasya-avirati-bhrānti-darśana-alabdha-bhūmikatva-anavasthitatvāni

31 चित्त-विक्षेपाः ते अन्तरायाः।
citta-vikṣepāḥ te antarāyāḥ।

32 दुःख-दौर्मनस्य-अङ्गमेजयत्व-श्वास-प्रश्वासाः विक्षेप-सहभुवः।
duḥkha-daurmanasya-aṅgamejayatva-śvāsa-praśvāsāḥ vikṣepa-sahabhuvaḥ।

33 तत् प्रतिषेध-अर्थम्-एक-तत्त्व-अभ्यासः।

tat pratiṣedha-artham-eka-tattva-abhyāsaḥ।

34 मैत्री-करुणा-मुदित-उपेक्षाणां सुख-दुःख-पुण्य-अपुण्य-विषयाणां भावनातः चित्त-प्रसादनम्।

maitrī-karuṇā-mudita-upekṣāṇāṃ sukha-duḥkha-puṇya-apuṇya-viṣayāṇāṃ bhāvanātaḥ citta-prasādanam।

35 प्रच्छर्दन-विधारणाभ्यां वा प्राणस्य।

pracchardana-vidhāraṇābhyāṃ vā prāṇasya।

36 विषयवती वा प्रवृत्तिः उत्पन्ना मनसः स्थिति-निबन्धिनी।

viṣayavatī vā pravṛttiḥ utpannā manasaḥ sthiti-nibandhinī।

37 विशोका वा ज्योतिष्मती।

viśokā vā jyotiṣmatī।

38 वीत-राग-विषयं वा चित्तम्।

vīta-rāga-viṣayaṃ vā cittam।

39 स्वप्न-निद्रा-ज्ञान-आलम्बनं वा।

svapna-nidrā-jñāna-ālambanaṃ vā।

40 यथा-अभिमत-ध्यानात् वा।

yathā-abhimata-dhyānāt vā।

41 परमाणु-परम-महत्त्व-अन्तः अस्य वशीकारः।

paramāṇu-parama-mahattva-antaḥ asya vaśīkāraḥ।

42 क्षीण-वृत्तेः अभिजातस्य इव मणेः ग्रहीतृ-ग्रहण-ग्राह्येषु तत् स्थ तत् अञ्जनता समापत्तिः।

kṣīṇa-vṛtteḥ abhijātasya iva maṇeḥ grahītṛ-grahaṇa-grāhyeṣu tat stha tat añjanatā samāpattiḥ।

43 शब्द-अर्थ-ज्ञान-विकल्पैः सङ्कीर्णा सवितर्का समापत्तिः।

śabda-artha-jñāna-vikalpaiḥ saṅkīrṇā savitarkā samāpattiḥ।

44 स्मृति-परिशुद्धौ स्वरूप-शून्या इव अर्थमात्र-निर्भासा निर्वितर्का।

smṛti-pariśuddhau svarūpa-śūnyā iva arthamātra-nirbhāsā nirvitarkā।

45 एतया एव सविचारा निर्विचारा च सूक्ष्म-विषया व्याख्याता।

etayā eva savicārā nirvicārā ca sūkṣma-viṣayā vyākhyātā।

46 सूक्ष्म-विषयत्वं च अलिङ्ग-पर्यवसानम्।

sūkṣma-viṣayatvaṃ ca aliṅga-paryavasānam।

47 ता एव सवीजः समाधिः।

tā eva savījaḥ samādhiḥ।

48 निर्विचार-वैशारद्ये अध्यात्म-प्रसादः।

nirvicāra-vaiśāradye adhyātma-prasādaḥ।

49 ऋतम्भरा तत्र प्रज्ञा।
ṛtambharā tatra prajñā।

50 श्रुत-अनुमान-प्रज्ञाभ्याम् अन्य-विषया विशेष-अर्थत्वात्।
śruta-anumāna-prajñābhyām anya-viṣayā viśeṣa-arthatvāt।

51 तत् जः संस्कारः अन्य-संस्कार-प्रतिबन्धी।
tat jaḥ saṃskāraḥ anya-saṃskāra-pratibandhī।

52 तस्य अपि निरोधे सर्व-निरोधात् निर्बीजः समाधिः।
tasya api nirodhe sarva-nirodhāt nirbījaḥ samādhiḥ।

Closing इति पतञ्जलि-विरचिते योग-सूत्रे प्रथमः समाधि-पादः।
iti patañjali-viracite yoga-sūtre prathamaḥ samādhi-pādaḥ।